श्रीः ।

अथ

श्रीमद्यामुनमुनिप्रणीतं

# स्तोत्ररत्नम् ।

## ( आळवन्दारस्तोत्रम् )

तच्च

श्रीकृष्णदासात्मज-गङ्गाविष्णोः

"लक्ष्मीवेङ्कटेश्वर" मुद्रणालये

रामचंद्र राघो इत्यनेन स्वाम्यर्थं

मुद्रितं प्रकाशितं च ।

कल्याण-मुंबई.

संवत् १९६८, शके १८३३.

॥ श्रीः ॥

## श्रीमते रामानुजाय नमः ।

# अथ आळवन्दारस्तोत्रम् ।

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम् ॥ स्तोत्रयामास योगीन्द्रस्तं वन्दे यामुनाह्वयम् ॥ १ ॥ नमो नमो यामुनाय यामुनाय नमो नमः ॥ नमो नमो यामुनाय यामुनाय नमो नमः ॥ २ ॥ नमो यामुनपादाब्जरेणुभिः पावितात्मने ॥ निरस्ताखिलदोषाय गुरवे विदितात्मने ॥ ३ ॥ नमोऽचिन्त्याद्भुताक्लिष्टज्ञानवैराग्यराशये ॥ नाथाय मुनयेऽगाधभगवद्भक्तिसिन्धवे ॥ ४ ॥ तस्मै नमो मधु-

जिदंघ्रिसरोजतत्त्वज्ञानानुरागमहिमाति-
शयान्तसीम्ने ॥ नाथाय नाथमुनयेऽत्र
परत्र चापि नित्यं यदीयचरणौ शरणं
मदीयम् ॥ ५ ॥ भूयो नमोऽपरिमिता-
च्युतभक्तितत्त्वज्ञानामृताब्धिपरिवाहशु-
भैर्वचोभिः ॥ लोकेऽवतीर्णपरमार्थस-
मग्रभक्तियोगाय नाथमुनये यमिनां व-
राय ॥ ६ ॥ तत्त्वेन यश्चिदचिदीश्वरतत्-
स्वभावभोगापवर्गतदुपायगतीरुदारः ॥
संदर्शयन्निरमिमीत पुराणरत्नं तस्मै
नमो मुनिवराय पराशराय ॥ ७ ॥
माता पिता युवतयस्तनया विभूतिस्स-
र्वं यदेव नियमेन मदन्वयानाम् ॥
आद्यस्य नः कुलपतेर्वकुलाभिरामं श्री-

त्तदंघ्रियुगलं प्रणमामि मूर्ध्ना ॥ ८ ॥
यन्मूर्ध्नि मे श्रुतिशिरस्सु च भाति य-
स्मिन्नस्मन्मनोरथपथः सकलः समेति ॥
स्तोष्यामि नः कुलधनं कुलदैवतं तत्पा-
दारविन्दमरविन्दविलोचनस्य ॥ ९ ॥
तत्त्वेन यस्य महिमार्णवशीकराणुः श-
क्यो न मातुमपि शर्वपितामहाद्यैः ॥
कर्तुं तदीयमहिमस्तुतिमुद्यताय मह्यं
नमोऽस्तु कवये निरपत्रपाय ॥ १० ॥
यद्वा श्रमावधि यथामति वाप्यशक्तः
स्तौम्येवमेव खलु तेऽपि सदा स्तुवन्तः ॥
वेदाश्चतुर्मुखमुखाश्च महार्णवान्तः को
मज्जतोरणुकुलाचलयोर्विशेषः ॥ ११ ॥
किंचैष शक्त्यतिशयेन न तेऽनुकम्प्यः

स्तोता पितुः स्तुतिकृतेन परिश्रमेण ॥
तत्र श्रमस्तु सुलभो मम मन्दबुद्धेरित्यु-
द्यमोऽयमुचितो मम चाब्जनेत्र ॥ १२ ॥
नावेक्षसे यदि ततो भुवनान्यमूनि नालं
प्रभो भवितुमेव कुतः प्रवृत्तिः ॥ एवं
निसर्गसुहृदि त्वयि सर्वजन्तोः स्वामिन्न
चित्रमिदमाश्रितवत्सलत्वम् ॥ १३ ॥
स्वाभाविकानवधिकातिशयेशितृत्वं ना-
रायण त्वयि न मृष्यति वैदिकः कः ॥
ब्रह्मा शिवः शतमखः परमः स्वराडित्ये-
तेऽपि यस्य महिमार्णवविप्रुषस्ते ॥ १४ ॥
कः श्रीः श्रियः परमसत्वसमाश्रयः कः
कः पुण्डरीकनयनः पुरुषोत्तमः कः ॥
कस्यायुतायुतशतैककलांशकांशे विश्वं

विचित्रचिदचित्प्रविभागवृत्तम् ॥ १५ ॥
वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमो-
चनमहिष्ठफलप्रदानैः ॥ कोऽन्यः प्र-
जाः पशुपतिः परिपाति कस्य पादोद-
केन स शिवः स्वशिरोधृतेन ॥ १६ ॥
कस्योदरे हरविरिञ्चिमुखः प्रपञ्चः को
रक्षतीममजनिष्ट च कस्य नाभेः ॥ क्रा-
न्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः
केन चैष परवानिति शक्यशङ्कः ॥ १७ ॥
त्वां शीलरूपचरितैः परमप्रकृष्टसत्त्वे-
न सात्त्विकतया प्रबलैश्च शास्त्रैः ॥ प्र-
ख्यातदैवपरमार्थविदां मतश्च नैवासुर-
प्रकृतयः प्रभवन्ति बोद्धुम् ॥ १८ ॥
उल्लङ्घितत्रिविधसीमसमातिशायि संभा-

वनं तव परिवृढिमस्वभावम् ॥ मा-
याबलेन भवतापि निगुह्यमानं पश्य-
न्ति केचिदनिशं त्वदनन्यभावाः ॥ १९ ॥
यदण्डमण्डान्तरगोचरं च यद्दशोत्तरा-
ण्यावरणानि यानि च ॥ गुणाः प्रधानं
पुरुषः परं पदं परात्परं ब्रह्म च ते विभू-
तयः ॥ २० ॥ वशी वदान्यो गुणवानृजुः
शुचिर्मृदुर्दयालुर्मधुरः स्थिरः समः ॥
कृती कृतज्ञस्त्वमसि स्वभावतः सम-
स्तकल्याणगुणामृतोदधिः ॥ २१ ॥
उपर्युपर्यब्जभुवोऽपि पूरुषान् प्रकल्प्य-
ते ये शतमित्यनुक्रमात् ॥ गिरस्त्वदे-
कैकगुणावधीप्सया सदा स्थिता नोद्य-
मतोऽतिशेरते ॥ २२ ॥ त्वदाश्रितानां

जगदुद्भवस्थितिप्रणाशसंसारविमोचना-
दयः ॥ भवन्ति लीलाविधयश्च वैदिका-
स्त्वदीयगम्भीरमनोनुसारिणः ॥ २३ ॥
नमो नमो वाङ्मनसातिभूमये नमो-
नमो वाङ्मनसैकभूमये ॥ नमो नमोऽ-
नन्तमहाविभूतये नमो नमोऽनन्तदयै-
कसिन्धवे ॥ २४ ॥ न धर्मनिष्ठोऽस्मि न
चात्मवेदी न भक्तिमांस्त्वच्चरणारवि-
न्दे ॥ अकिञ्चनोऽनन्यगतिः शरण्य त्व-
त्पादमूलं शरणं प्रपद्ये ॥ २५ ॥ न नि-
न्दितं कर्म तदस्ति लोके सहस्रशो यन्न
मया व्यधायि॥सोऽहं विपाकावसरे मुकु-
न्द क्रन्दामि संप्रत्यगतिस्तवाग्रे ॥ २६ ॥
निमज्जतोऽनन्तभवार्णवान्तश्चिराय मे

कुलमिवासि लब्धः ॥ त्वयापि लब्धं भगवन्निदानीमनुत्तमं पात्रमिदं दयायाः ॥ २७ ॥ अभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखम् ॥ किंतु त्वदग्रे शरणागतानां पराभवो नाथ न तेऽनुरूपः ॥ २८ ॥ निरासकस्यापि न तावदुत्सहे महेश हातुं तव पादपङ्कजम् ॥ रुषा निरस्तोऽपि शिशुः स्तनंधयो न जातु मातुश्चरणौ जिहासति ॥ २९ ॥ तवामृतस्यन्दिनि पादपङ्कजे निवेशितात्मा कथमन्यदिच्छति ॥ स्थितेऽरविन्दे मकरन्दनिर्भरे मधुव्रतो नेक्षुरसं हि वीक्षते ॥ ३० ॥ त्वदङ्घ्रिमुद्दिश्य कदापि केनचिद्यथातथा वापि सकृत्कृतोऽञ्ज-

लिः ॥ तदैवमुष्णात्यशुभान्यशेषतः शु-
भानि पुष्णाति न जातु हीयते ॥ ३१ ॥
उदीर्णसंसारदवाशुशुक्षणिं क्षणेन नि-
र्वाप्य परां च निर्वृतिम् ॥ प्रयच्छति
त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिन्धु-
सीकरः ॥ ३२ ॥ विलासविक्रान्तपरावरा-
लयं नमस्यदार्तिक्षपणे कृतक्षणम् ॥
धनं मदीयं तव पादपङ्कजं कदानु साक्षा-
त्करवाणि चक्षुषा ॥ ३३ ॥ कदा पुनः
शङ्खरथाङ्गकल्पकध्वजारविन्दाङ्कुशवज्र-
लाञ्छनम् ॥ त्रिविक्रम त्वच्चरणाम्बुज-
द्वयं मदीयमूर्द्धानमलंकरिष्यति ॥ ३४ ॥
विराजमानोज्ज्वलपीतवाससं स्मिता-
तसीसूनसमामलच्छविम् ॥ निमग्नना-

भिं तनुमध्यमुन्नतं विशालवक्षःस्थलशो-
भिलक्षणम् ॥ ३५ ॥ चकासतं ज्याकि-
णकर्कशैः शुभैश्चतुर्भिराजानुविलम्बि-
भिर्भुजैः ॥ प्रियावतंसोत्पलकर्णभूषण-
श्लथालकाबन्धविमर्दशंसिभिः ॥ ३६ ॥
उदग्रपीनांसविलम्बिकुण्डलालकावली-
बन्धुरकम्बुकन्धरम् ॥ मुखश्रियान्यक्कृ-
तपूर्णनिर्मलामृतांशुबिम्बाम्बुरुहोज्ज्व-
लश्रियम् ॥ ३७ ॥ प्रबुद्धमुग्धाम्बुजचारु-
लोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरम् ॥
शुचिस्मितं कोमलगण्डमुन्नसं ललाट-
पर्यन्तविलम्बितालकम् ॥ ३८ ॥ स्फुर-
त्किरीटाङ्गदहारकण्ठिकामणीन्द्रकाञ्ची-

१ उल्लसदिति पाठान्तरम् ।

गुणनूपुरादिभिः ॥ रथाङ्गशङ्खासि-
गदाधनुर्वरैर्लसत्तुलस्या वनमालयोज्ज्व-
लम् ॥ ३९ ॥ चकर्थ यस्या भवनं भुजा-
न्तरं तव प्रियं धाम यदीयजन्मभूः ॥
जगत्समग्रं यदपाङ्गसंश्रयं यदर्थमम्भो-
धिरमन्थ्यबन्धि च ॥ ४० ॥ स्ववैश्वरू-
पेण सदानुभूतयाप्यपूर्ववद्विस्मयमाद-
धानया ॥ गुणेन रूपेण विलासचेष्टितैः
सदा तवैवोचितया तव श्रिया ॥ ४१ ॥
तया सहासीनमनन्तभोगिनि प्रकृष्ट-
विज्ञानबलैकधामनि ॥ फणामणिव्रात-
मयूखमण्डलप्रकाशमानोदरदिव्यधाम-
नि ॥ ४२ ॥ निवासशय्यासनपादुकां-
शुकोपधानवर्षातपवारणादिभिः ॥ श-

रीरभेदैस्तव शेषतां गतैर्यथोचितं शेष इतीर्यते जनैः ॥ ४३ ॥ दासः सखा वाहनमासनं ध्वजो यस्ते वितानं व्यजनं त्रयीमयः ॥ उपस्थितं तेन पुरो गरुत्मता त्वदङ्घ्रिसंमर्दकिणाङ्कशोभिना ॥ ४४ ॥ त्वदीयभुक्तोज्झितशेषभोजिना त्वया निसृष्टात्मभरेण यद्यथा ॥ प्रियेण सेनापतिना निवेदितं तथानुजानन्तमुदारवीक्षणैः ॥ ४५ ॥ हताखिलक्लेशमलैः स्वभावतः सदानुकूल्यैकरसैस्तवोचितैः ॥ गृहीततत्तत्परिचारसाधनैर्निषेव्यमाणं सचिवैर्यथोचितम् ॥ ४६ ॥ अपूर्वनानारसभावनिर्भरप्रबुद्धया मुग्धविद-

१ तदेति पाठान्तरम् ।

ग्घलीलया ॥ क्षणानुवर्तिक्षिप्तपरादिकाल-
या प्रहर्षयन्तं महिषीं महाभुजम् ॥ ४७ ॥
अचिन्त्यदिव्याद्भुतनित्ययौवनं स्वभा-
वलावण्यमयामृतोदधिम् ॥ श्रियः श्रियं
भक्तजनैकजीवितं समर्थमापत्सखम-
र्थिकल्पकम् ॥ ४८ ॥ भवन्तमेवानुचर-
न्निरन्तरं प्रशान्तनिःशेषमनोरथान्त-
रः ॥ कदाहमैकान्तिकनित्यकिंकरः
प्रहर्षयिष्यामि सनाथजीवितम् ॥ ४९ ॥
धिगशुचिमविनीतं निर्दयं मामलज्जं
परमपुरुष योऽहं योगिवर्याग्रगण्यैः ॥
विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं तव
परिजनभावं कामये कामवृत्तः ॥ ५० ॥
अपराधसहस्रभाजनं पतितं भीमभ-

वार्णवोदरे ॥ अगतिं शरणागतं हरे
कृपया केवलमात्मसात्कुरु ॥ ५१ ॥
अविवेकघनान्धदिङ्मुखे बहुधा संत-
तदुःखवर्षिणि ॥ भगवन् भवदुर्दिने प-
थस्खलितं मामवलोकयाच्युत ॥ ५२ ॥
न मृषा परमार्थमेव मे शृणु विज्ञापन-
मेकमग्रतः ॥ यदि मे न दयिष्यसे ततो
दयनीयस्तव नाथ दुर्लभः ॥ ५३ ॥
तदहं त्वदृते न नाथवान्मदृते त्वं दय-
नीयवान्न च ॥ विधिनिर्मितमेतदन्वयं
भगवन् पालय मा स्म जीहपः ॥ ५४ ॥
वपुरादिषु योऽपि कोऽपि वा गुणतोऽ-
सानि यथातथाविधः ॥ तदहं तव पादप-
द्मयोरहमद्यैव मया समर्पितः ॥ ५५ ॥

मम नाथ यदस्ति योऽस्म्यहं सकलं तद्धि
तवैव माधव ॥ नियतः स्वमिति प्रबुद्धधी-
रथवा किंनु समर्पयामि ते ॥ ५६ ॥ अ-
वबोधितवानिमां यथा मयि नित्यां भ-
वदीयतां स्वयम् ॥ कृपयैवमनन्यभो-
ग्यतां भगवन् भक्तिमपि प्रयच्छ मे॥५७॥
तव दास्यसुखैकसङ्गिनां भवनेष्वस्त्व-
पि कीटजन्म मे ॥ इतरावसथेषु मा स्म-
भूदपि मे जन्म चतुर्मुखात्मना ॥ ५८ ॥
सकृत्त्वदाकारविलोकनाशया तृणीकृता-
नुत्तमभक्तिमुक्तिभिः ॥ महात्मभिर्मामि-
वलोक्यतां नय क्षणेऽपि ते यद्विरहोऽति-
दुःसहः ॥५९॥ न देहं न प्राणान्न च सुखम-
शेषाभिलषितं नचात्मानं नान्यत्किम-

पि तव शेषत्वविभवात् ॥ बहिर्भूतं नाथ क्षणमपि सहे यातु शतधा विनाशं तत्सत्यं मधुमथनविज्ञापनमिदम् ॥ ६० ॥ दुरन्तस्यानादेरपरिहरणीयस्य महतो विहीनाचारोऽहं नृपशुरशुभस्यास्पदमपि ॥ दयासिन्धो बन्धो निरवधिकवात्सल्यजलधे तव स्मारं स्मारं गुणगणमितीच्छामि गतभीः ॥ ६१ ॥ अनिच्छन्नप्येवं यदि पुनरपीच्छन्निव रजस्तमश्छन्नच्छद्मस्तुतिवचनभङ्गीमरचयम् ॥ तथापीत्थं रूपं वचनमवलम्ब्यापि कृपया त्वमेवैवंभूतं धरणिधर मे शिक्षय मनः ॥ ६२ ॥ पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृत्त्वमेव त्वं मित्रं गुरुरपि

गतिश्चासि जगताम् ॥ त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गतिरहं प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ॥ ६३ ॥

जनित्वाहं वंशे महति जगति ख्यातयशसां शुचीनां युक्तानां गुणपुरुषतत्त्वस्थितिविदाम् ॥ निसर्गादेव त्वच्चरणकमलैकान्तमनसामधोऽधः पापात्मा शरणद निमज्जामि तमसि ॥ ६४ ॥ अमर्यादः क्षुद्रश्चलमतिरसूयाप्रसवभूः कृतघ्नो दुर्मानी स्मरपरवशो वञ्चनपरः ॥ नृशंसः पापिष्ठः कथमहमितो दुःखजलधेरपारादुत्तीर्णस्तव परिचरेयं चरणयोः॥ ६५ ॥

रघुवर यदभूस्त्वं तादृशो वायसस्य प्रणत इति दयालुर्यस्य चैद्यस्य कृष्ण ॥ प्र-

तिभवमपराद्धुर्मुग्धसायुज्यदो भूर्वद कि-
मपदमागस्तस्य तेऽस्ति क्षमायाः ॥ ६६ ॥
ननु प्रपन्नस्सकृदेव नाथ तवाहमस्मी-
ति च याचमानः ॥ तवानुकम्प्यः स्मरतः
प्रतिज्ञां मदेकवर्ज्यं किमिदं व्रतं ते ॥६७॥
अकृत्रिमत्वच्चरणारविन्दप्रेमप्रकर्षावधि
मात्मवन्तम् ॥ पितामहं नाथमुनिं वि-
लोक्य प्रसीदमद्वृत्तमचिन्तयित्वा ॥६८॥
यत्पादाम्भोरुहध्यानविध्वस्ताशेषकल्म-
षः ॥ वस्तुतामुपयातोऽहं यामुनेयं
नमामि तम् ॥ ६९ ॥

इति श्रीयामुनाचार्यविरचितम् आळवन्दारस्तोत्रं संपूर्णम् ।

---

१ स्मरतत्प्रतिज्ञामिति पाठान्तरम् ।

२ वर्जमिति पाठान्तरम् ।

# अनर्घनलचरित्र.

## महानाटक.

महाशय ! इस अनर्घनलचरित्रनाटकमें महाभारतोक्त नलदमयंतीकी समग्र कथा लिखीगई है. नलदमयंतीकी कथा जैसी कुछ सारगर्भित तथा अनेक प्रकारसे शिक्षाप्रद है उसको समग्र संसार जानता है और सभी लोग इस कथाके जानने तथा सुननेमें रुचि रखते हैं। ऐसा किसका हृदय पत्थर होगा जो नलदमयंतीकी करुणकथाको पढसुनकर पिघल न जाय। और भाषामें आजतक महानाटक नहीं बना यह महानाटक है। और आजकलहके नाटकोंमें मनमाने गर्भांक दियें जातेहैं इसमें संस्कृतके नाट्यशास्त्रकी रीतिसे गर्भांक दियागयाहै। संस्कृतनाट्यशास्त्रसे अनभिज्ञलोग इस अनर्घनलचरित्रनाटकको पढकर संस्कृतके नाट्यशास्त्रकी मर्यादाको तथा गर्भांककी मर्यादाको भलीभांति जानसकते हैं, क्योंकि यह नाटक संस्कृतनाट्यशास्त्रकी मर्यादासे बतायागयाहै। और इस ग्रंथके पढनेसे संस्कृतभाषाका बोधभी बहुत कुछ होसकताहै।

महाशय ! आजदिन साहित्यशास्त्रके परमाचार्य काशीके महामहोपाध्याय सी. आई. ई. विद्वद्वरश्री ७ श्रीगंगाधरशास्त्रीजी महाराजही हैं ऐसा कौन पुरुष है जो उक्त श्रीशास्त्रीजीमहाराजकी विद्यासमुद्र न जानताहो यह नाटक उक्त श्रीशा-

स्वीजी महाराजके एकवात्सल्यपात्र छात्र पंजाबी पंडितसुदर्शनाचार्यशास्त्रीने बनाया है और क्या लिखें आप एक वेर देखिये तभी आप कविके चातुर्यको जानसकते हैं। कविने औरभी अनेक ग्रंथ संस्कृतमें तथा भाषामें लिखकर विद्वत्समाजमें नाम पाया है। कविने भूमिकामें नलदमयंतीकी मूलकथाभी समग्र लिखदी है। सभकी सुलभताके कारण इसका दाम केवल १ एकही मुद्रा नियत कियाहै। जिसके हाथमें यह ग्रंथ गया उसने फिर छोडा नहीं।

## कूटपद्यव्याख्या

महाशय! व्यासादि महर्षि तथा प्राचीन ग्रंथोंमें कोई २ ऐसे कठिन श्लोक हैं कि जिनके अर्थसे सामान्य तो क्या परंतु बडे बडे पंडितभी वंचित रहते हैं. इसलिये बहुतसे ग्रंथोंमेंसे कूट श्लोकोंको उद्धृत कर त्रिपाठ्युपनामक पं. उमादत्तजीने सप्रमाण और विस्तृत व्याख्या कर उक्त अभावको मिटाया है इसलिये गुणग्राही महाशयोंसे अनुरोध करते हैं कि इस "कूटपद्यव्याख्या" नामक पुस्तकका अवश्य संग्रह करिये और कूटश्लोकोंके उत्तम २ अर्थोंका

रसास्वाद लीजिये. इस व्याख्याके अतिरिक्त और इस पुस्तकमें भक्तमनोरंजनी, याज्ञी और नारसिंही इन व्याख्याओंकाभी समावेश किया है विशेष लिखनेकी अवाश्यकता नहीं, पुस्तक संग्रह योग्य है. मू. ६ आना.

## बारहमासतरंग.

इसमें भांति २ के बारहमासे ऐसी २ दिलचस्प लावनियोंमें लिखे गये हैं जिनके पढनेसे दिल फडक जाता है " सामनकी रुतमें झमके तो मोरा रँग क्या सुहाए " इत्यादि दिलके ऊपर मोहिनी डालनेवाली बातें कभी प्यारीके मुखसे सुनी हैं ? इस पुस्तकके पढनेसे येही चटपटी मजेदार बातें शैर गजलें ठुमरी हरेक महीने और मौसममें गानेलायक मिलेंगे । पुस्तक कैसी मनोहर बनी है यह एक बार देखनेहीसे प्रतीत होगा । मूल्य ६ आना.

---

पुस्तक मिलनेका ठिकाना-गंगाविष्णु श्रीकृष्णदास,
" लक्ष्मीवेंकटेश्वर " छापाखाना,
कल्याण-मुंबई.

# सूचना.

अपने यन्त्रालयमें वैदिक, वेदान्त, पुराण, धर्मशास्त्र, न्याय, व्याकरण, छन्द, ज्योतिष, काव्य, अलंकार, चम्पू, नाटक, कोश, वैद्यक, सांप्रदायिक, स्तोत्र आदि संस्कृत ग्रन्थ और हिन्दीभाषाके अनेकानेक ग्रन्थ विक्रयार्थ प्रस्तुत हैं. जिन महाशयोंको सब पुस्तकोंका नाम और भाव तपास करना होय उनको आध आनेका टिकट भेजनेसे सूचीपत्र विना दाम भेजेंगे.

पुस्तकें मिलनेका ठिकाना—

गंगाविष्णु श्रीकृष्णदास,

'लक्ष्मीवेङ्कटेश्वर' छापाखाना,

कल्याण—मुंबई.